स्योत्पत्तिः। विशेषतः शोकमोहनिमग्नायार्ज्जुनाय स्वयं भगवता वासुदेवेनाप्युपदिष्टम्। यथा, भगवद्गीतायाम्। ६। ४५-४७।

"प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम्॥
तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्म्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्ज्जुन!॥
योगिनामपि सर्व्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः"॥

तथा च श्रीमद्भागवते। ३। २५। १३।
"स्वमातरं देवभूतिं प्रति कपिलोक्तिः। यथा,
"योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे।
अत्यन्तोपरतिर्यत्र दुःखस्य च सुखस्य च"॥

योगाश्चपि क्रियाभक्तिज्ञानादिभेदेन बहुधा सन्ति तत्र प्रथमतः क्रियायोग एव तत्वज्ञानप्रेप्सुनाप्यविदुषा संसारासक्तमनसा समाचरणीयः॥ ननु "ज्ञानादृते मुक्तिर्नास्ति"। "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"। "विद्ययामृतमश्नुते"। इत्यादौ सति कथं क्रियायोगएवारम्भणीय इत्युपदिश्यते? इति चेत् सत्यम्। किन्तु लोके हि श्रद्धाभक्तितपस्यादिषु सात्त्विकराजसतामसादिप्रकृतिभेदात् तेषामविद्याविमोहितानां स्वस्वगुणानुसारिणीं प्रवृत्तिं विचार्य्य शोध्यांस्तान् प्रत्यनुकम्पयाविद्योत्थाभिमानमोहरागद्वेषादिपरिहरणेन शनैः शनैः सत्त्वशोधनार्थं महात्मभिः शास्त्रकृद्भिरादौ क्रियायोगएव विहितः। कीदृश्यस्तेषां गुणानुसारिण्यः प्रवृत्तयस्तादृशीभिः प्रवृत्तिभिः समन्वितानां कार्य्यं वा किमिति चेत् अवधार्य्यताम्। यथा, भगवद्गीतायाम्। १७। ३—१३॥

"सत्त्वानुरूपा सर्व्वस्य श्रद्धा भवति भारत!।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः॥
यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः॥
अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः॥
कर्षयन्तः शरीरस्थं भूतग्राममचेतसः।
माञ्चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान्॥
आहारस्त्वपि सर्व्वस्य त्रिविधो भवति प्रियः।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु॥
आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः। [प्रियाः॥
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विक-
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः॥
यातयामं गतरसं पूतिपर्य्युषितञ्च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्॥
अफलाकाङ्क्षिभिर्यज्ञो विधिदिष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः॥
अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ! तं यज्ञं विद्धि राजसम्॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते"॥

"कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः"। इत्यत्र "अतिशब्दः कट्वादिषु सप्तस्वपि सम्बध्यते। तेन अतिकटुर्निम्बादिः अत्यम्लोऽतिलवणोऽत्युष्णश्च प्रसिद्धः अतितीक्ष्णो मरिचादिः अतिरूक्षः कङ्गुकोद्रवादिः अतिविदाही सर्षपादिः"॥ इति स्वामी। अमेध्यम् अपवित्रम्॥ यष्टव्यं यजनीयमर्च्चनीयमिति यावत्॥ फलमभिसन्धाय उद्दिश्य इज्यते यज्ञः क्रियते इत्यर्थः॥ ब्राह्मणादिभ्यो न सृष्टं दत्तमन्नं यद्वा न निष्पादितमन्नं भक्ष्यभोज्यादिकं यस्मिन् यज्ञे तम्। विधिहीनं शास्त्रोक्तविधिशून्यम्। अदक्षिणं दक्षिणाविरहितमिति॥

नन्वेवं चेत् तर्हि कीदृशोऽयमविदुषानुष्ठेयः क्रियायोगस्तस्य सत्त्वशोधनार्थं इति जिज्ञासायां ब्रूमः॥ यथा, पातञ्जले।
"तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः"॥
तपः शास्त्रान्तरोपदिष्टं चान्द्रायणादि, स्वाध्यायः प्रणवपूर्व्वाणां मन्त्राणां जपः। ईश्वरप्रणिधानं सर्व्वक्रियाणां तस्मिन् परमगुरौ फलनिरपेक्षतया समर्पणम्। एतानि क्रियायोग उच्यते। इति राजमार्त्तण्डवृत्तिः।

यद्यप्यत्र चान्द्रयणादीति तपसोऽर्थो व्याख्यातः किन्तु शास्त्रान्तरे मतान्तरमपि दृश्यते तच्च कायिकादिभेदेन त्रिविधम्। यथा, भगवद्गीतायाम्। १७। १४—१६।

"देवद्विजगुरुप्राज्ञपूजनं शौचमार्ज्जवम्।
ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्।
स्वाध्यायाभ्यासनञ्चैव वाङ्मयं तप उच्यते॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते"॥

एतेषां तपसामपि त्रिगुणानुसारिप्रकृत्यादिभेदेन तपःकर्म्माण्यपि त्रिविधानि परिकीर्त्तितानि। तत्रैव। १७। १७—१९॥

"श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥
सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥
मूढ़ग्राहेणात्मनो यत् पीड़या क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्"॥

अपि च अशेषतः कर्म्मणां त्यागः कर्त्तव्यः नित्यादिकं कर्त्तव्यं वेति जातसंशयमर्ज्जुनं प्रति भगवतउपदेशः। यथा, तत्रैव। १८। ३—१०॥

"त्याज्यं दोषवदित्येके कर्म्म प्राहुर्मनीषिणः।
यज्ञदानतपःकर्म्म न त्याज्यमिति चापरे॥
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम!।
त्यागो हि पुरुषव्याघ्र! त्रिविधः संप्रकीर्त्तितः॥
यज्ञदानतपःकर्म्म न त्याज्यं कार्य्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥
एतान्यपि तु कर्म्माणि सङ्गं त्यक्त्वा फलानि च।
कर्त्तव्यानीति मे पार्थ! निश्चितं मतमुत्तमम्॥
नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः॥
दुःखमित्येवं यत्कर्म्म कायक्लेशभयात्त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥
कार्य्यमित्येव यत्कर्म्म नियतं क्रियतेऽर्ज्जुन!।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः॥
न द्वेष्ट्यकुशलं कर्म्म कुशले नानुषज्जते।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः"॥

कार्य्यमिति। कार्य्यं कर्त्तव्यं नियतं नित्यमित्यर्थः॥ फलतः न हि देहधारिणामशेषतः कर्म्मणस्त्यागः सम्भवेत् यथा, तत्रैव। १८। ११॥
"न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः।
यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते"॥
परं अनिष्टादिफलमत्यागिनामेव न हि सन्न्यासिनां कदाचित् फलसम्बन्धः। तत्रैव। १८। १२॥
"अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित्"॥

अतः काम्यानां कर्म्मणां परित्यागस्तथा सर्व्वतः फलाभिसन्धानत्यागपूर्ब्बस्य ईश्वरार्पणपरस्य वा नित्यादेः कर्म्मणः करणमेव सत्त्वशोधनार्थं प्रशस्यते। यतः सर्व्वत्र सात्त्विकज्ञानस्यैव संसारबन्धनच्छेत्तृत्वं राजसतामसयोस्तु भेदज्ञानत्वात् संकीर्णज्ञानत्वाच्च बन्धमोहकारित्वमेव दृश्यते यथा, तत्रैव। १८। २०-२२॥

"सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥
पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥
यत् तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्"॥

सुतरां तेषां गुणभेदेन कर्म्माण्यपि पृथक्त्वेनोक्तानि। यथा, तत्रैव। १८। २३-२५॥

"नियतं सङ्गरहितमरागद्वेषतः कृतम्।
अफलप्रेप्सुना कर्म्म यत्तत्सात्त्विकमुच्यते॥
यत्तु कामेप्सुना कर्म्म साहङ्कारेण वा पुनः।
क्रियते बहुलायासं तद्राजसमुदाहृतम्॥
अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्।
मोहादारभ्यते कर्म्म यत्तत् तामसमुच्यते"॥

कर्त्तारोऽपि त्रिविधाः। तत्रैव। १८। २६-२८॥

"मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्व्विकारः कर्त्ता सात्त्विक उच्यते॥
रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः॥
अयुक्तः प्राकृतस्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते"॥

एवं सति सर्व्वत्र हि विशुद्धसत्त्वगुणस्यैव ब्रह्मसिद्धये कारणत्वं बोध्यते। विशुद्धसत्त्वाश्रयी साधको हि शनैः शनैः भक्त्यात्मकस्य क्रियात्मकादेर्वा योगादेर्निरन्तराभ्यासबलात् आदिपदेनाच्च केवलं विद्याबलाद् वेति सूच्यते। निष्कामः सन् सत्त्वोद्रेकेणान्तःकरणस्थानि सर्व्वाणि पापानि सन्दह्य तत्त्वज्ञानं प्राप्नुयात्। ततस्तज्ज्ञानेनात्मसाक्षात्कारं लब्ध्वा जीवन्मुक्तो भवेत्। ततः कैवल्यं प्राप्य नित्यानन्दमयो भवेत्।